गामाविश्य च भूतानि धारयाम्यहमोजसा ।

पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १५.१३ ॥

gāmāviśya ca bhūtāni dhārayāmyahamojasā |
pusṇāmi causạdhīḥ sarvāḥ somo bhūtvā rasātmakaḥ || 15.13||

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।

प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १५.१४ ॥

ahaṁ vaiśvānaro bhūtvā prāṇināṁ dehamāśritaḥ |
prāṇāpānasamāyuktaḥ pacāmyannaṁ caturvidham || 15.14||

सर्वस्य चाहं हृदि सन्निविष्टो

मत्तः स्मृतिर्ज्ञानमपोहनंच ।

वेदैश्च सर्वैरहमेव वेद्यो

वेदान्तकृद्वेदविदेव चाहम् ॥ १५.१५ ॥

sarvasya cāhaṁ hṛdi sanniviṣṭo
mattaḥ smṛtirjñānamapohanañca |
vedaiśca sarvairahameva vedyo
vedāntakṛdvedavideva cāham || 15.15||

द्वाविमौ पुरुषौ लोके क्शरश्चाक्शर एव च ।

क्शरः सर्वाणि भूतानि कूटस्थोऽक्शर उच्यते ॥ १५.१६ ॥

dvāvimau puruṣau loke kśaraścākśara eva ca |
kśaraḥ sarvāṇi bhūtāni kūṭastho'kśara ucyate || 15.16||